# shrI shAradA parameshvarI suprabhAtam

# શ્રીશારદા પરમેશ્વરી સુપ્રભાતમ્

## Document Information

Text title : shrii shaaradaa parameshvarii suprabhaatam

File name : shAradAparameshvarisupr.itx

Category : suprabhAta, devii, sarasvatI, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : April 17, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશારદા પરમેશ્વરી સુપ્રભાતમ્

ૐ શ્રીશારદે જગન્માતઃ પૂર્વા સંધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ કરુણાપાઙ્ગૈઃ કર્તવ્યં વિશ્વમઙ્ગલમ્ ॥

શ્રીશૃઙ્ગાદ્રિપુરી રત્નસિંહાસનનિવાસિની ।
ઉત્તિષ્ઠ શારદામ્બ શ્રી શઙ્કરાચાર્ય સન્નુતે ॥

ઉત્તિષ્ઠોત્તિષ્ઠ ભગવત્પાદશઙ્કરમૂર્તિભિઃ ।
જગદ્ગુરુભિરારાધ્યે જગજ્જનનિ શારદે ॥

બ્રહ્મર્ષયોઽમ્બ સનકાદય એત્ય ભક્ત્યા
બ્રાહ્મીમનન્ય મનસો હૃદિ બ્રહ્મવિદ્યામ્ ।
ત્વામામનન્ત્યુપનિષત્સરસીજ હંસીમ્
શ્રીશારદામ્બ વરદે તવ સુપ્રભાતમ્ ॥

ફુલ્લાનિ પઙ્કજવનાનિ સતાં મનાંસિ
ધીવૃત્તયશ્ચ સરિતશ્ચ દિશઃ પ્રસાન્નાઃ ।
અજ્ઞાનમાશુ તિમિરં ચ વિલીયતેઽમ્બ
શ્રી શારદે વિજયતે તવ સુપ્રભાતમ્ ॥

હંસઃ પ્રયાત્યુદયમમ્બુજ કાનનેષુ
હંસાઃ પ્રસન્નમનસો મુદિતા રમન્તે ।
હંસાત્મના પરમહંસકુલં મુદાસ્તે
શ્રી શારદે વિજયતે તવ સુપ્રભાતમ્ ॥

શ્રદ્ધાધનાશ્શમદમાદિયુતા વિનેયાઃ
શુદ્ધાશયા વિદલિતાખિલકર્મબન્ધાઃ ।
આજ્ઞાવિમુક્તિ પદભાજ ઇમે બ્રુવન્તિ
શ્રી શારદામ્બ વિમલં તવ સુપ્રભાતમ્ ॥

ગીર્વાણવૃન્દમખિલં પુરતો વિધાય

ગીર્વાણવન્દ્યમુપયાત્યુચિતોપહારૈઃ ।
શર્વાદિસન્નુતપદામિહ સેવિતું ત્વામ્
શ્રી શારદામ્બ શિવદં તવ સુપ્રભાતમ્ ॥

સર્વાર્તિહારિણિ સમસ્ત સુખપ્રદાત્રિ
દુર્વાદિગર્વશમયિત્રિ જગજ્જનિત્રિ ।
નિર્વાણદાત્રિ નિગમાન્ત વિબોધયિત્રિ
શ્રી શારદે શિવસ્વરૂપિણિ સુપ્રભાતમ્ ॥

સદ્વેદશાસ્ત્ર નિગમાન્ત રહસ્ય વિજ્ઞાઃ
પ્રાજ્ઞાસ્ત્વદઙ્ઘ્રિ સરસીજ પરાગગન્ધમ્ ।
આઘ્રાય દિવ્યમભવન્નિખિલાઃ કૃતાર્થાઃ
શ્રી શારદે સુમનસસ્તવ સુપ્રભાતમ્ ॥

મુક્તિસ્થિતા કરતલે હૃદયે પ્રમોદઃ
જિહ્વાગ્રગાશ્ચ સહસૈવ સમસ્તવિદ્યાઃ ।
ત્વદ્દર્શનં ભવતિ યસ્ય હિ તસ્ય પુંસઃ
શ્રી શારદામ્બ શુભદં તવ સુપ્રભાતમ્ ॥

ત્વત્સંસ્મૃતેઽરપિ નરં વિજહાત્યલક્ષ્મીઃ
લક્ષ્મીઃ સમાશ્રયતિ નૂનમચઞ્ચલામ્બ ।
શ્રદ્ધાવતાં ત્વયિ વિમુક્તિરયત્નસિદ્ધા
શ્રી શારદે જગદધીશ્વરિ સુપ્રભાતમ્ ॥

બ્રહ્માત્મભાવમધિગમ્ય હૃદા સદાત્મા
રામા અપિ ત્વદમલાઙ્ઘ્રિ સરોજરેણૂન્ ।
વાઞ્છત્યમી પરમહંસકુલાવતંસાઃ
શી શારદામ્બ હૃદયે તવ સુપ્રભાતમ્ ॥

તુઙ્ગાસરિદ્વિમલવારિ તરઙ્ગરઙ્ગ
રિઙ્ગત્સરોજવનદિવ્ય સુગન્ધવાહઃ ।
અઙ્ગીકુરુષ્વ પવનઃ પ્રકરોતિ સેવામ્
શ્રી શારદામ્બ કૃપયા તવ સુપ્રભાતમ્ ॥

પ્રાક્ સિન્ધુ પાથસિ ત્રયીતનુરેષભક્ત્યા
સ્નાતસ્તથોદય ગિરાવુદિતસ્તપસ્વી ।
ત્વત્પાદપદ્મભજનાય સહસ્રભાનુઃ

શ્રી શારદામ્બ સમુદેતિ ચ સુપ્રભાતમ્ ॥

બ્રહ્માચ્યુતત્રિનયના વિનયેન ભક્ત્યા
સિંહાસને સ્થિતવતીં પ્રણવસ્વરૂપામ્ ।
વાચા હૃદા ચ વપુષા ચ સમાશ્રયન્તિ
શ્રી શારદામ્બ પરમેશ્વરિ સુપ્રભાતમ્ ॥

ઇન્દ્રાનલાદય ઇમે દિગધીશ્વરાશ્ચ
સૂર્યેન્દુભૌમબુધગીષ્પતિ શુક્રમુખ્યાઃ ।
સર્વે ગ્રહાશ્ચ ભયભક્તિયુતા નમન્તિ
શ્રી શારદે તવ મહેશ્વરિ સુપ્રભાતમ્ ॥

દેવાઙ્ગનામણિગણશ્ચ શચીમુખોઽયમ્
ત્વામીશ્વરીં ત્રિજગદેક સમર્ચનીયામ્ ।
સંસેવિતું સુસમયે સમુપાગતેઽસ્મિન્
શ્રી શારદામ્બ વિહિતે તવ સુપ્રભાતમ્ ॥

વાચા સુધા મધુરયા રમણીય સપ્ત
તન્ત્રીપ્રકર્શ મધુરસ્વનયા મહત્યા ।
દેવર્ષિવર્ય ઇહ ગાયતિ ભક્તિનમ્રઃ
શ્રી શારદામ્બ મધુરં તવ સુપ્રભાતમ્ ॥

ત્વત્પાદપઙ્કજ પરાગ સુગન્ધલેશમ્
આઘ્રાય સત્કવિમદભ્રમરા પ્રહૃષ્ટાઃ ।
ગાયન્તિ કોમલમનોહરવૃત્તપદ્યૈઃ
શ્રી શારદામ્બ લલિતૈસ્તવ સુપ્રભાતમ્ ॥

શ્રી વ્યાસશઙ્કરસુરેશ્વરપદ્મપાદા
દ્યાચાર્યવર્યપરિપૂજિત પાદપદ્મે ।
લીલાશુકાક્ષવલયોજ્વલ પાણિપદ્મે
શ્રી શારદામ્બ પરમે તવ સુપ્રભાતમ્ ॥

પદ્માક્ષિ પદ્મમુખિ પદ્મભવાદિવન્દ્યે
પદ્માલયેઽખિલવરાભય પાણિપદ્મે ।
હૃત્પદ્મપીઠમધિતિષ્ઠ મમાપિ માતઃ
શ્રી શારદે કરુણયા તવ સુપ્રભાતમ્ ॥

યઃ પુસ્તકાક્ષવલયાઞ્ચિત પાણિપદ્મામ્
વાગીશ્વરીં હૃદયપદ્મગતાં સ્મરેત્વામ્ ।
વાગીશતાં સમુપયાતિ સ સદ્ય એવ
શ્રી શારદામ્બ ભુવને તવ સુપ્રભાતમ્ ॥

સંસારસાગરમપારમનન્તલોલ
કલ્લોલ દુર્લલિતમેતમતીત્યતૂર્ણમ્ ।
તીર્ણઃ સ્વયં સ ખલુ તારયતિ શ્રિતામ્શ્ચ
શ્રી શારદે સ્મરતિ યસ્તવ સુપ્રભાતમ્ ॥

રાકાશશાઙ્કરમણીય મનોજ્ઞકાન્તિમ્
સોમાવતમ્સમકુટાં સુમકોમલાઙ્ગીમ્ ।
ત્વાં સંસ્મરામિ કૃપયૈવ વિલોકયન્તીમ્
શ્રી શારદામ્બ હૃદિ માં તવ સુપ્રભાતમ્ ॥

દાતું ત્રિવર્ગમપવર્ગમપિ ત્રિલોક્યાઃ
નૂનં નિજસ્મરણતોઽપિ સમેધમાને ।
ત્વદ્વક્ત્ર ચન્દ્રમસિ ચન્દ્રમસાપયાતમ્
શ્રી શારદામ્બ શશિના તવ સુપ્રભાતમ્ ॥

પૂર્ણે કલઙ્કરહિતે ભુવનાર્તિહારિ-
ણ્યજ્ઞાનસન્તમસભેદિનિ ત્વન્મુખેન્દૌ ।
નિત્યોદિતે જગતિ ભક્તચકોરલોકઃ
શ્રી શારદામ્બ મુદિતસ્તવ સુપ્રભાતમ્ ॥

પુણ્યાઃ સ્ત્રિયાશ્ચ પુરુષાશ્ચ કલાવપિ ત્વામ્
માતર્યદા કૃતયુગે પરયામ્બ ભક્ત્યા ।
સંસેવ્ય શૃઙ્ગગિરિપીઠગતાં કૃતાર્થાઃ
શ્રી શારદે કૃતધિયસ્તવ સુપ્રભાતમ્ ॥

ત્વત્સેવનાય ભવબન્ધવિમુક્તિકામાઃ
કારુણ્યકલ્પલતિકે કતિચિન્મહાન્તઃ ।
આયાન્તિ શુદ્ધચરિતાસ્સુધિયશ્ચ ભક્તાઃ
શ્રી શારદે પ્રમુદિતાસ્તવ સુપ્રભાતમ્ ॥

શ્રી ચન્દ્રશેખર જગદ્ગુરુ સાર્વભૌમ
શ્રી પાણિ પદ્મજ જગદ્ગુરુસાર્વભૌમૈઃ ।

તત્પાણિપઙ્કજ સમુત્થ ગુરૂત્તમૈશ્ચ
શ્રી શારદામ્બ વિનુતે તવ સુપ્રભાતમ્ ॥

યે સજ્જના અનુદિનં મુદિતાઃ પ્રભાતે
ભક્ત્યા પઠન્તિ પરયા ભુવિ શારદાયાઃ ।
શ્રીસુપ્રભાત વિનુતિં સકલૈર્વિમુક્તાઃ
ક્લેશૈઃ પ્રયાન્તિ પુરુષાર્થ ચતુષ્ટયં દ્રાક્ ॥

યે સુપ્રભાતમિદમાશ્રિતવત્સલાયાઃ
શ્રદ્ધાયુતા અનુદિનં હૃદિ શારદાયાઃ ।
પ્રાતઃ પઠન્તિ મનુજા જગદમ્બિકાયાઃ
તે પ્રાપ્નુવન્તિ સુજનાસ્સકાલાનભીષ્ટાન્ ॥

શ્રી શારદા સુપ્રભાત સ્મરણાત્કરુણાનિધિઃ ।
પારદા સ્યાત્ ક્ષણેનૈવાપારસંસાર વારિધેઃ ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

*shrI shAradA parameshvarI suprabhAtam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*